ISSN- 2320- 5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
संस्कृतदर्शनविभागस्य peer-reviewed शोधपत्रिका)

## दशमः अङ्कः

उपदेष्टा

स्वामी आत्मप्रियानन्दः

स्वामी जपसिद्धानन्दः

सम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानम्
वेलुडमठम्

प्रज्ञालोकः
(संस्कृतदर्शनविभागस्य वार्षिकी द्विभाषामयी विशेषज्ञसमीक्षिता शोधपत्रिका)
*Prajñāloka*
(Annual Bi-lingual **Peer-reviewd Research Journal** of the Department of Sanskrit & Philosophy)
ISSN- 2320-5911

**सम्पादकः** - डॉ. राकेशदाशः
**सम्पादकमण्डली** - डॉ. वेङ्कटरमणभट्टः, डॉ. गोपीकृष्णन् रघुः, डॉ. नागराजभट्टः, डॉ. नीरजकुमारभार्गवः, स्वामी वेदार्थानन्दः, डॉ. शन्तनुः अयाचितः, डॉ. सुखदेवभट्टः

**Editor :** Dr. Rakesh Das
**Board of Editors :** Dr. Venkataramana Bhat, Dr. Gopikrishnan Reghu, Dr. Nagaraja Bhat, Dr. Neeraj Kumar Bhargave, Swami Vedarthananda, Dr. Shantanu Ayachita, Dr. Sukhdev Bhat

**प्रकाशकः** - कुलसचिवः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु, भारतवर्षे

**Publisher :** Registrar
Ramakrishna Mission Vivekananda Educational and Research Institute (RKMVERI)
Belur Math, Howrah, West Bengal, India
E-mail : prajnaloka.rkmvu@gmail.com

©प्रकाशकस्य

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | |
|---|---|---|
| १. | निवेदनम् | |
| २. | Foreword<br>Swami Atmapriyananda | iii |
| ३. | केनोपनिषदमाश्रित्य शङ्काद्वयस्य समाधानम्<br>ब्रह्मचारी शुभदीपः | 1 |
| ४. | कैवल्योपनिषद्दिशा कैवल्यस्वरूपविमर्शः<br>शैवाल आचार्यः | 11 |
| ५. | अस्तिसिद्धोऽपृक्तः<br>राकेशदाशः | 19 |
| ६. | स्थानेऽन्तरतमः<br>सुजितमाहातिः | 28 |
| ७. | वाक्यविज्ञानम्<br>कृष्णगोपालपात्रः | 38 |
| ८. | न्यायवैशेषिकयोः तन्त्रयुक्तिविमर्शः<br>लक्ष्मीनारायणराउः | 47 |
| ९. | Cultural life as reflected in *ViṣṇuSmṛti*<br>Anusrita Mandal | 62 |

# न्यायवैशेषिकदर्शने तन्त्रयुक्तिविमर्शः

लक्ष्मीनारायण-राउ*

प्राचीनभारते नवनवोन्मेषशालिन्या प्रतिभया बहुविधं विषयमाश्रित्य बहुविधानि शास्त्राणि विरचितानि। परन्तु यथेच्छं शब्दार्थप्रयोगेन साधु शास्त्रं न भवेत्। तदर्थं केचन नियमाः काश्चन रीतयश्चाश्रीयन्ते। ता रीतयः पुनः युक्तिव्याख्याः। एवं युक्तिव्याख्याणां शास्त्र-रचनानां निकषो हि तन्त्रयुक्तिरिति विद्वांस आमनन्ति। तत्तन्त्रयुक्तिजातमेव अविशेषतया विबुधैः दर्शनागमव्याकरणादिशास्त्रव्याख्यानावसरे उपायीभूतत्वेन साधनमिति मुक्तकण्ठं निर्विवादं जेगीयते। यद्यपि तन्त्रशब्देन सामान्यतः सर्वं शास्त्रमेव बोध्यते तथापि शब्दोऽयं विशेषसाधनशास्त्रार्थे हि प्रयुज्यते। चरकसंहितासुश्रुतसंहिताष्टाङ्गहृदयाद्यायुर्वेदादिग्रन्थेभ्यो हि तन्त्रशब्दस्य शास्त्रार्थः स्फुटः। किञ्च अर्थशास्त्रे पञ्चदशाधिकरणे अतिविस्तारेण द्वात्रिंशत् तन्त्रयुक्तयो व्याख्याताः कौटिल्याचार्येण। सिद्धान्तलक्षणे न्यायसूत्रकारेण गौतमेन प्रयुक्तस्तन्त्रशब्दः शास्त्रार्थः। वस्तुतो विस्तारार्थक-तन्-धातोः त्रल्-प्रत्ययद्वारा निष्पन्नेन तन्त्रशब्देन परस्परसम्बन्धयुक्तार्थानाम् उपदेशमूलकं शास्त्रं परामृश्यते। युक्तिशब्दस्त्वत्र उपायवाची। न हि एताः युक्तीः प्रत्याख्याय शक्यते तन्त्रं प्रणेतुम्।

एवं तन्त्रयुक्तिविषये नैयायिकानामपि आसीत् परमवधानमित्यस्मिन् विषये नास्ति कापि विप्रतिपत्तिः, यतो हि सूत्राक्षरतयानुल्लिखितापि तन्त्रयुक्तिरियं भाष्यकारैः वात्स्यायनाचार्यैः 'परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः' इति स्वगिरा स्वीकृता। तथाहि जयन्तभट्टीयन्यायमञ्जर्यां वैशेषिकसूत्रेषु तद्भाष्येषु च सानुसन्धानं पर्यालोचनद्वारा प्रतिपादिता इयं तन्त्रयुक्तिः। तथाहि अधस्तावद्यावतीनां तन्त्रयुक्तीनां विशदालोचनं समुपस्थाप्यते–

**अतिक्रान्तावेक्षणम्**

पूर्वप्रतिपादितविषयस्य पुनर्निर्देश एवातिक्रान्तावेक्षणम्। न्यायशास्त्रेऽस्य सापेक्षत्वं दरीदृश्यते। तथाहि भाष्यकृता वात्स्यायनेन न्यायशास्त्रस्य पञ्चमाध्याये शब्दार्थयोः सम्बन्धस्योपपत्तिः प्रतिपादिता। तथाहि 'यत्तदवोचाम अस्येदम्' इति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः शब्दार्थयोः सम्बन्ध इति समयं तमवोचाम इति निगदितं

---

* सहायकाध्यापकः, संस्कृतविभागे, मौलाना-आजाद-महाविद्यालयः



भाष्यकारेण वात्स्यायनेन। अतिक्रान्तावेक्षणरूपां तन्त्रयुक्तिं प्रयुज्य पुनरुक्ति-दोषपरिहारः सुकर इति जयन्तभट्टेन निगद्यते। तथाहि तेनालोच्यते- 'निरवयवकवाक्यार्थवादश्च प्रागेव विस्तरेण निरस्त इत्यलं पुनरुक्तालापेन'[1] इति।

**अतिदेशः**

अतिदेशो नाम एकस्यान्यत्रारोपः। अनया च तन्त्रयुक्त्या विषयवस्तुनः कस्यचित् धर्ममुपवर्ण्य तदन्यत्रारोप्यते। कस्यचिद् विषयस्य वर्णनानन्तरं तद्द्वारेणैव अनुक्तविषयस्यावगमनार्थं या पद्धतिः सैवातिदेशतन्त्रयुक्तिरिति चरकसंहिताटीकाकृतः चक्रपाणिदत्तस्य मतम्। वेदविहितप्रकृतिविकृतियागकर्मसु अतिदेशरूपायास्तन्त्रयुक्तेः परं सापेक्षत्वं दृश्यते। तद्व्याख्याप्रसङ्गादेव जयन्तभट्टेनोपदेशातिदेशयोर्मिथो वैलक्षण्यं प्रतिपादितम्। उपदेशानुसारेण कार्यविधिरुपदेशे प्रवर्तते, अतिदेशे च कार्यानुसारमुपदिश्यते इति तयोः पार्थक्यम्। तथाहि विषयेऽस्मिन् "नन्वेवमुभयत्र तदवगमाविशेषादुपदेशातिदेशयोः को विशेषः? न नियोगावगमे कश्चिद्विशेषः, किन्तूपदेशे, यथोपदेशं कार्यमतिदेशे तु यथाकार्यमुपदेश इत्येव तयोर्विशेषः"[2] इति जयन्तभट्टीयमतमनुसन्धेयम्।

**अनागतावेक्षणम्**

पश्चादेव विहितमित्यनागतावेक्षणम्। 'परं वक्ष्यते' इत्येवं प्रकारेण न्यायदर्शनव्याख्यानां बहुस्थलेषु अनागतावेक्षणतन्त्रयुक्तिः प्रयुज्यमाना दरीदृश्यते। यथा–

IIJ Impact Factor : 2.206

ISSN - 2395-5104

# शब्दार्णव
# Shabdarnav

*International Peer Reviewed Journal of Multidisciplinary Research*

Year-4

Vol. 8, Part-I July-December, 2018

*Scientific Research*
*Educational Research*
*Technological Research*
*Literary Research*
*Behavioral Research*

*Editor in Chief*
*DR. RAMKESHWAR TIWARI*
*Assist. Professor, Shree Baikunth Nath Pawahari Sanskrit Mahavidyalay*
*Baikunthpur, Deoria*

*Executive Editors*
Dr. Kumar Mritunjay Rakesh
Mr. Raghwendra Pandey

*Published by*
Samnvay Foundation
Muzaffarpur, Bihar

# अलंकारशास्त्रेषु शास्त्रव्याख्यानोपायविमर्शः

लक्ष्मीनारायण-रावः *

(चरकसंहितासुश्रुतसंहिताष्टाङ्गहृदयाष्टाङ्गसंग्रहादिग्रन्थेषु शास्त्रव्याख्यानोपायाः दरीदृश्यन्ते। तत्र शास्त्रव्याख्यानोपायास्तन्त्रयुक्तिरिति नाम्ना परिस्फुटाः। किञ्च, कौटिलीयार्थशास्त्रेऽपि पञ्चदशाधिकरणे वैशद्येन द्वात्रिंशत्तन्त्रयुक्तयो व्याख्याताः कौटिल्याचार्येण। तथाहि प्राचीनार्वाचीनालंकारिकैः रचितेषु अलंकारशास्त्रेष्वपि एतास्तन्त्रयुक्तयः प्रयुक्ता दृश्यन्ते। यद्यपि तेषां लक्षणं न तत्र स्पष्टीकृतं दृश्यते तथापि वाक्येषु तेषां प्रयोजनत्वं परिलक्ष्यते। तदेवात्र समासेन समुपनिबद्धं निबन्धकारेण मया)।

भाषायां व्युत्पत्त्यर्जनाय व्याकरणशास्त्रं यथा आवश्यकं तद्वत् काव्ये नैपुण्यलाभायापि अलङ्कारशास्त्रमपेक्षितम्। काव्यानां स्वरूपदोषगुणालङ्कारादिविषये सम्यग्ज्ञानं प्रददाति अलङ्कारशास्त्रम्। अतः अलङ्कारशास्त्रज्ञानाभावात् यथा काव्ये नैपुण्यं नायाति तद्वद् वाक्यगतदोषाणामपि यथार्थज्ञानं न लभ्यतेऽस्माभिः। किं बहुना, वैदिकलौकिकोभयशास्त्रेषु वैदुष्यलाभायापि अलङ्कारशास्त्रेणास्ति प्रयोजनम्। अलङ्कारशास्त्रालङ्कारेऽपि काचन रीतिः पद्धतिः तन्त्रयुक्तिर्वा अनुस्रियते आलङ्कारिकैः। विशेषतः विश्वनाथाचार्यैः कृतेषु षट्त्रिंशन्नाटकलक्षणेष्वपि काचन तन्त्रयुक्तिः परिलक्ष्यते। वस्तुतः प्राचीनार्वाचीनालङ्कारिकैः रचितेषु अलङ्कारशास्त्रेषु तन्त्रयुक्तिरियं प्रयुक्ता दृश्यते। तद्यथा

**अतिक्रान्तावेक्षणम्**– पूर्वोक्तविषयस्य पुनरुल्लेखो हि अतिक्रान्तावेक्षणम्। आचार्येण दण्डिना काव्यादर्शे पूर्वं प्रतिज्ञातं गौडपादवैदर्भमार्गवर्णनमुपसंहृतोक्तं – 'इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात्'। जगन्नाथाचार्येणापि रसगङ्गाधरग्रन्थे 'संयोगपरहस्वप्राचुर्यरूपं गाढत्वमोजः ' तथा च 'अविदग्धवैदिकादिप्रयोगयोग्यानां पदानां परिहारेण प्रयुज्यमानेषु पदेषु लोकोत्तरशोभारूपमौज्ज्वल्यं कान्तिः ' चेति ओजः कान्तिलक्षणं प्रदर्श्य पूर्ववर्णितः श्लोकः उदाहरणत्वेन निर्दिष्टः। तदुच्यते – "यथा वा 'अयं पततु निर्दयम्' इत्यादि प्रागुदाहृते। ...... यथा 'नितराम्' इत्यादि प्रागुदाहृते"[1]।

**अतिदेशः**– प्रागुक्तविषयेणानुक्तविषयसाधनमतिदेशः। अर्थात् सामान्यमर्थं प्रकाश्य तेनानुक्तविषयस्य कृतेऽप्यनुरूपं भाव्यमिति अतिदेश इति चक्रपाणिदत्तमतिः। यथा मोहाद् यथायथज्ञानाभावात् तस्मिन् विषये भामहेन कलाविरुद्धदोषमालोच्य अन्यत्रापि एवमभिधेयमिति काङ्क्षितम्। तदुक्तम् – 'इति साधारितं मोहादन्यथैवावगच्छति। अन्यास्वपि कलास्वेवमभिधेया विरोधिता"[2]।

**अधिकरणम्**– शास्त्र चर्चायाः प्रतिपाद्यो विषयो ह्यधिकरणम्। यमर्थमधिकृत्य वोच्यते तदधिकरणमिति। यथा अनुबन्धचतुष्टयेषु विषयोऽन्यतमः। अतो विषयस्य यथार्थज्ञानमृते शास्त्राध्ययने पाठकानां प्रवृत्तिर्न स्यादिति कृत्वा ग्रन्थप्रतिपाद्यो विषय आदौ आलोचितव्यः। तदुच्यते –

**"सिद्धार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।**
**ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥"[3]**

तथाहि काव्यादर्शाचार्येण दण्डिना काव्यादर्शस्य प्रारम्भे काव्यलक्षणं कर्तव्यमिति सिद्धान्तितम्। तदुच्यते काव्यादर्शे – 'यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्'[4]।

**अनागतावेक्षणम्**– अनागतं विधिं प्रमाणीकृत्य अर्थसाधनमिति अनागतावेक्षणम्। साहित्यदर्पणकारेण साहित्यदर्पणे प्रथमपरिच्छेदे 'वाक्यं रसात्मकं काव्यम्' इति निर्देशितम्, परञ्च तृतीयाध्याये रसस्वरूपमालोचितम्। एवं प्रथमपरिच्छेदे गुणदोषविषयमुल्लिख्य सप्तमे अष्टमे वा परिच्छेदे विस्तरेण तदालोचितम्। 'उपपादयिष्यते च स्थाय्यादीनामपि मलक्ष्यक्रमव्यङ्ग्यत्वम्' इति जगन्नाथोक्त्यापि परं कस्यचिद् विषयस्योपपादनं विवक्षितम्।

**अनुमतम्**– परवाक्यमप्रतिषिद्धमनुमतम्। भाट्टमीमांसकैः प्राचीननैयायिकैश्च तात्पर्यवृत्तिप्रतिपादनं विश्वनाथाचार्येणाप्यनुमतं समर्थितं वा। तदुक्तं साहित्यदर्पणे –

**"तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।**
**तात्पर्यार्थं तदर्थञ्च वाक्यं तद्बोधकं परे॥"[5]**

एवं '..... यः कौमारहरः.......' इत्यादौ अत्र यत् काव्यप्रकाशकारेण रसस्य प्राधान्यमित्युक्तं तद्रसनधर्मयोगित्वाद् व्यभिचारिभावस्यापि रसशब्दवाच्यत्वेन गतार्थं मन्तव्यम्"[6]।

**अपदेशः**– एवमसौ आह इत्यपदेशः। अर्थात् प्रतिज्ञातवाक्यस्य कारणप्रदर्शनं ह्यपदेशः। वस्तुतः अर्थान्तरन्यासकाव्यलिङ्गालङ्कारयोः आलोचनायाम् अपदेशस्योपयोगिता परिलक्ष्यते। कारणं हि, अर्थान्तरन्यासालङ्कारस्याष्टभेदेषु कारणेन कार्यस्य समर्थनमन्यतमम्। उदाहरणं यथा – 'सहसा विदधीत न क्रियाम्'। अत्र

---

* सहायकाध्यापकः, मौलाना-आजाद-महाविद्यालयः

IIJ Impact Factor : 3.178 ISSN-2349-364X

# वेदाञ्जली

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोधपत्रिका

*(International Peer Reviewed Refereed Journal of Multidisciplinary Research)*

वर्ष-७ अंक-१४ भाग-२

जुलाई-दिसम्बर, २०२०

प्रधानसम्पादक

डॉ0 रामकेश्वर तिवारी

सह सम्पादक

श्री प्रसून मिश्र

प्रकाशक

वैदिक एजूकेशनल रिसर्च सोसाइटी

वाराणसी

# उपनिषदि प्राणमाहात्म्यम्

लक्ष्मीनारायण: राओ:*

('मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति आपस्तम्भवचनाद् वेदस्य द्वैविध्यं परिस्फुटम्। तत्र ब्राह्मणांशस्यापि पुन: आरण्यकोपनिषत्तया द्वैविध्यं परिलक्ष्यते। तस्माद्वेदस्यान्तिमा तावदुपनिषदिति ज्ञायते। निखिलवैदिकसाहित्येषु उपनिषत्स्वेवाधिक्येन प्राणविद्याया: वर्णनमुपलभ्यते। तत्रापि उपनिषत्सु प्राचीनासु केनकठप्रश्नमुण्डकतैत्तिरीयश्वेताश्वेतरछान्दोग्यबृहदारण्यकादिमुख्यासु वर्णितं प्राणमाहात्म्यं निबन्धेऽस्मिन्नुपस्थापयितुं चेष्टे।)

**कुञ्चीशब्दा:**— प्राण:, विराट्, ब्रह्म, वायु:, अन्नमयकोष:, प्राणमयकोष: चेति।

'प्राणिति जीवति बहुकालम्' इति विग्रहेण 'अन प्राणने' इत्यर्थकात् प्रपूर्वकात् अन्धातोरुत्तरम् अच्प्रत्ययेन अथवा 'प्राणिति अनेन' इति विग्रहेण प्रपूर्वकादनते: घञा निष्पन्न: प्राणशब्द: स्वस्वशसन वेत्यर्थको भवति। वस्तुत: शरीरस्य स्ववायुर्येन कश्चन जीवित उच्यते स एव वायु: प्राण इति सामान्यार्थकत्वमिति प्राणशब्दस्येति। स चायं प्राण: स्वराश्रयोऽपि अन्नावष्टम्भो भवति। तदाम्नातं छान्दोग्योपनिषदि — 'स्वरस्य का गतिरिति, प्राण इति होवाच; प्राणस्य का गतिरित्यन्नमिति होवाच'[1] इति।

ननु कस्तावत् प्राणशब्दार्थ इति चेदुच्यते प्राणशब्द: खलु क्वचिद्ब्रह्मार्थक:, क्वचिद्ब्रह्मणमपि बोधयति, क्वचिद्वान्योऽर्थको भवति। तद्यथा शतपथब्राह्मणे बोधार्थक: प्राणशब्दोऽनेकत्र प्रयुज्यते। तत्र च नानादेवतासंज्ञाभि: संज्ञित: प्राणशब्द:। तथोक्तं तत्र — 'प्राणो वै वात:'[2], 'प्राणो वा अग्नि:'[3], 'प्राणो ह वा अस्य सविता'[4], 'प्राणो वै वाचस्पति:'[5], 'प्राणो हि प्रजापति:'[6], 'प्राणो वै मित्र:'[7], 'प्राण: सोम:'[8], 'प्राणो वै ब्रह्म'[9] इति। अर्थात् वायु:, अग्नि:, सविता, वाचस्पति:, प्रजापति:, मित्र:, सोम:, ब्रह्म चेत्येते देवा: प्राणशब्देन परामृष्टा:। किञ्च, प्राणशब्दस्य विराट्रूपोऽर्थोऽपि परिस्फुट:। 'विशेषेण राजते इति विराड्' – अर्थाद्यस्तावत् विशेषतया समग्रे विश्वे प्रकाशमान: दृश्यते स एव विराडिति। वस्तुतो विश्वव्यापिनी शक्तिरेव विराडिति कथ्यते। शास्त्रेषु प्राणस्य विराट्स्वरूपत्वं बहुत्रावाप्यते। अथर्ववेदीयमन्त्रेषु स्पष्टतयाम्नायते यत् प्राण एव विराट्, स च प्रेरको निदेशकश्च। स एव प्रजापति:, सूर्य:, चन्द्रमाश्च।। अत एवोच्यते-

**'प्राणो विराट् प्राणो देष्ट्री प्राणं सर्वे उपासते।**
**प्राणो ह सूर्यश्चन्द्रमा: प्राणमाहु: प्रजापतिम्'।।**[10]

जीवस्तु वायुबलात् संसारेऽस्मिन् राजते इत्यत: सर्वेषां प्राणिनां समष्टिभूतो वायुरेव विराट्। विराट्रूपोऽयं वायुर्जगत: सर्वत्रैव विराजमानो विद्यते। अन्तरिक्षे द्युलोके परिव्याप्तोऽयं वायु: प्राण एव। अत: प्राणस्य सर्वव्यापकत्वमपि प्रकटितम्।

प्राणस्तु व्यष्टिसमष्टिभेदाद् द्विविध:। तत्र महासत्ता विश्वव्यापकं तेज: समष्टिप्राण:। स हि प्राणो हिरण्यगर्भो विराडिति। निखिलं जगत् समष्टिप्राणसत्ताविशिष्टम्। व्यष्टिप्राणस्तु प्रत्येकेषु प्राणेषु विलसति। यावच्छरीरे तस्यावस्थानं तावदेव प्राणिन: प्राणवन्त आयुष्मन्तो वा भवन्ति। मुख्यप्राणस्य प्राणोऽपानो व्यान: समान उदानश्च पञ्चवृत्तय: सन्ति। प्रत्येकस्य प्राणस्य पञ्चवृत्तय: सन्ति। तेषां पुन: नाग: कूर्म: कृकरो देवदत्तो धनञ्जयश्च पञ्चवृत्तय: सन्ति। प्रत्येकस्य प्राणस्य कार्यभेदादेव नामवैभिन्न्यम्।

उपनिषत्सु केनोपनिषदि शान्तिमन्त्रे आदौ प्राणशब्दस्योल्लेख: प्राप्यते। ततश्च तत्रैव प्राणस्य प्राण: खलु वायुरित्युक्त्वा सर्वदेवतामयी, अनिर्वचनीयमवर्णनीयं ब्रह्म इत्याम्नातम्। कठोपनिषदि प्राणशब्दस्यार्थ: वायुरित्युक्त्वा सर्वदेवतामयी, अदितिदेवी प्राणरूपेण प्रादुर्भूतेति घोषिता। तदुच्यते कठोपनिषदि — 'या प्राणेन सम्भवत्यदितिर्देवतामयी'[11] इति। अत्रादितिशब्दस्यार्थो हि य: शब्दादीन् भुङ्क्ते इति। प्राणोऽपि भूतपञ्चकमत्तीत्यत: सर्वजगद्भोक्त्री, अदितिदेवी प्राणरूपेण प्रादुर्भूतेति घोषिता। तदुच्यते कठोपनिषदि — 'या प्राणेन सम्भवत्यदितिर्देवतामयी'[11] इति। अत्रादितिशब्दस्यार्थो हि य: शब्दादीन् भुङ्क्ते इति। प्राणोऽपि भूतपञ्चकमत्तीत्यत: इमां प्राणात्मिकामदितिं यो वस्तुत: सोऽपि अत्ता भोक्तेति। सोऽयं प्राण: देवानामाधारयिता, जगत्कार्यसम्पादयिता च वस्तुत

*सहायक:अध्यापक:, संस्कृतविभागीय:, मौलानामहाविद्यालयस्य-आजाद-

IIJ Impact Factor : 2.193 ISSN-2349-364X

# वेदाञ्जली

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोध पत्रिका

*(International Peer Reviewed Journal of Multidisciplinary Research)*

वर्ष-५ अंक-१० भाग-३

जुलाई-दिसम्बर २०१८

प्रधानसम्पादक

डॉ0 रामकेश्वर तिवारी

असिस्टेन्ट प्रोफेसर, श्री बैकुंठनाथ पवहारी संस्कृत महाविद्यालय

बैकुंठपुर, देवरिया

सह सम्पादक

श्री प्रसून मिश्र

प्रकाशक

वैदिक एजूकेशनल रिसर्च सोसाइटी

वाराणसी

# गीतोक्तमायावादविमर्शः

लक्ष्मीनारायण-राव:*

(ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः इति शङ्कराचार्योक्तवचनात् जीवब्रह्मणोर्नास्ति कश्चन भेद इति सुस्पष्टम्। परन्तु मायाच्छन्ना जनाः नास्ति जगद्भिन्नं किमपि सत्यमित्यामनन्ति। मायावशात्ते ब्रह्मणः प्रकृतस्वरूपं न जानन्ति। शास्त्रेष्वपि तन्मायाविषयकं विस्तृतमालोचनं प्राप्यते। किञ्च 'मम माया दुरत्यया', 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः', 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' चेत्यादिभगवद्गीतावचनेष्वपि मायायाः सत्त्वं मायायुक्तस्यैवेश्वरस्य च जगत्कर्तृत्वं वर्ण्यते।)

माधातोः 'माछाससिभ्यो यः' इति पाणिनिसूत्रेण यप्रत्यये तस्माद्वापि मायाशब्दो निष्पद्यते। मीयते अनेन संसारः इति माया, मीयते निर्मीयते जगद्यया सा माया, मीयते ज्ञायते आत्मन्यध्यस्तं जगद्यया सा माया चेत्यादयोऽर्थाः प्रतिपादयितुं शक्यन्ते मायाशब्दस्य। तथाहि मायालक्षणं कृतं चित्सुखाचार्येण तत्त्वप्रदीपिकायां –

**"अनादिभावरूपं यद्विज्ञानेन प्रलीयते। तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते।।"[1]**

वेदान्तसारेऽपि अज्ञानलक्षणं दृश्यते एवम् – 'अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित्' इति। अर्थात् अज्ञानं न सन्मुक्तौ तदभावदर्शनात्। अज्ञानं न ह्यसत्तत्कार्यस्य जगतो भावप्रतीतिसम्भवात्। किञ्च, असन्नाम अलीकं शशशृङ्गादि, तस्मादलीकस्य कदापि कस्मिन्नप्यधिकरणे यथा ज्ञानं न भवति तथैव 'अहमज्ञः' इत्याद्यनुभवेषु अज्ञानस्यापरोक्षप्रतीतिर्भवति। एवं नाज्ञानं सदसदुभयात्मकम्, एकस्मिन्नेव धर्मिणि अज्ञाने सदसतोर्विरुद्धधर्मयोः अवस्थानासम्भवात्। अतो माया कोटित्रयविनिर्मुक्ता सदसद्विलक्षणा अनिर्वचनीया सत्त्वरजस्तमोरूप - गुणत्रयात्मिका च। सा चेयं माया विद्याविरोधिनी। अर्थात् यावन्न ब्रह्मज्ञानोदयस्तावद्धि मायोपहिता जना जगति कार्येषु प्रवर्तन्ते। उदिते च ब्रह्मज्ञाने माया तिरोहिता स्यात्। अपि च, इयं माया भावरूपा। अत्र भावरूपत्वं नामाभावविलक्षणत्वमात्रमेव।

सृष्टिकाले भगवान् आदौ मायां प्रकाशयामास। सा माया अघटनघटनपटीयसी, द्रष्टृदृश्यानुसन्धानरूपा कार्यकारणरूपा अचिन्तितफलप्रदा च । तस्या मायाया महत्तत्त्वं जातं, तस्मादहंकारः, तस्मात् पञ्चभूतानि, तस्माद् ब्रह्माण्डमिति श्रीभागवतमतम्। अस्या मायाया नामान्तराणि यथा प्रकृतिः, अविद्या, अज्ञानम्, प्रधानम्, शक्तिः, अजा चेत्यादीनि। ऋग्वेदे मायाशब्दस्यादावुल्लेखो दृश्यते। तत्र देवराजस्येन्द्रस्य शक्तिरूपेण मायाशब्दः कल्पितः। तथा चाम्नातं –

**"रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश।।"[2]**

उपनिषन्मते माया हि ईश्वरशक्तिः, यया च ब्रह्मणो यथार्थस्वरूपमावृतम्। प्रश्नोपनिषद्यपि सम्यगुक्तं यत् मायात्यागेनैव जीवो ब्रह्मैकत्वं लभते। तदाम्नातं – 'तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति' इति। भगवता श्रीकृष्णेनाप्युक्तं –

**"दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।।"[3]** इति।।

अर्थात् त्रिगुणात्मिका मम माया अतिदुस्तरा। परन्तु यः पुरुषः केवलं मामेव निरन्तरं भजते स मायाबन्धनान्मुक्तो भवति। तस्य संसारेऽस्मिन् पुनरावर्तनं नास्ति। श्वेताश्वतरोपनिषद्यप्याम्नातं यद् यो मनुष्यः सदा ब्रह्मचिन्तनरतः स न मायाबन्धनपाशयुतः। ननु केयं मायेति विषये जगद्गुरुणा शङ्कराचार्येण तस्य विवेकचूडामणिग्रन्थे मायास्वरूपं व्यक्तमेव

**"अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा।**
**कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते।।"[4]**

अर्थात् अव्यक्तनाम्नी त्रिगुणात्मिका अविद्या चेयं माया परमेश्वरस्यापरा शक्तिरिति कथ्यते। सा माया न सद्रूपा, नासद्रूपा, न सदसद्रूपा, न सदसद्भिन्ना, नाङ्गसहिता, नाङ्गरहिता, नोभयात्मिका, अपि चानिर्वचनीया। तथाह्युच्यते –

**"सन्नाप्यसन्नाप्युभयात्मिका नो, भिन्नाप्यभिन्नाप्युभयात्मिका नो।**
**साङ्गाप्यनङ्गाप्युभयात्मिका नो महाद्भुतानिर्वचनीयरूपा।।"[5]**

विविधशास्त्रेषु मायाशब्दः प्रकृत्यविद्याप्यामाज्ञानादिशब्दैः शब्दितः। एतन्मायोत्पन्नं सत्त्वादिगुणत्रयं जीवात्मना बध्नाति। जगति कार्येषु प्रेरयति, अपि तु सृष्टिप्रक्रियाञ्च नियमयति। तदुच्यते गीतायां

**"तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्। सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ।।"[6]**

---

* सहायकाध्यापक, मौलाना-आज़ाद-महाविद्यालयस्य